N.A.
Siddhanta lakshanam patrika
सिद्धान्त लक्षण पत्रिका
Sanskrit
Paper – Handwritten
N.A. (Very old)
26 Folio
14.8"X4.8" & 11.6"X5"
Incomplete

१० क्र८ नं ६८

सिद्धान्तलक्षणपत्रिका



॥सि॥ श्रीगणेशाय नमः॥ शिवाय नमः॥ अथ सिद्धान्तलक्षणपत्रिका॥ अथ तत्र व्यक्तित्वावच्छेदेनाभावमादायाव्याप्तिवारणायानवच्छेदकानुसरणं नच तत्तद्व्यक्तित्वे सा
१ ध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकत्वाभावात्कथं तद्व्यक्त्यभावो लक्षणघटक इति वाच्यं॥ प्रतियोगितावच्छेदकताघटकसंबंधेन प्रतियोगितानव
च्छेदकस्य वैशिष्ट्यनिवेशेनैव सूक्ष्मविचाराधीनतया रूपवत्त्वव्याप्तिवान् रूपाभावमादायाव्याप्तिवारणसंभवात्. साध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेद
कत्वनिवेशे इति विभावनीयं॥ यद्यपि तत्तद्व्यक्तित्वावच्छिन्नाभाववारणाय तन्निवेशः तदा विजातीयवद्व्यक्त्यभावमादायैवाव्याप्तिवारणायानवच्छेद
कत्वानुसरणं॥ अन्यथाऽवीयविशेषणतया वैशिष्ट्येन साध्यवदवृत्तित्वाभावात् एव लक्षणघटकइत्वनैव तत्तद्व्यक्तित्वावच्छिन्नाभाववारणसंभ
वात् कथं अनवच्छेदकत्वानुसरणं इति चेत् न वह्निमान् धूमादित्यादावव्याप्तिः घटाभावस्य लक्षणाघटकत्वादिति वाच्यं वह्न्यभावाभावस्य तत्र
घटकत्वात् तत्र पर्वतत्वादिरूपस्य पर्वतादेः स्वरूपसंबंधेनावृत्तेः स्वरूपसंबंधेनाभावस्यैकविशेष्यकान्तस्य लक्षणाघटकत्वादिति वाच्यं प्रतियो-
गितावच्छेदकावच्छिन्नसंबंधन्यायादवस्थानमतो वह्निमान् धूमादित्यादावव्याप्तिवारणाय प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्यावश्यं निवे
शनीयतया कथं वह्न्यभावाभावो लक्षणघटक इति वाच्यं। साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताघटकेन साध्यतावच्छेदकसंबंधातिरिक्तसंबं
धावच्छिन्नत्वसाध्य निष्ठतोऽपि यावत्संबंधवत्त्वस्य प्रतियोगितावाच्यत्वेऽपि न कोऽपि दोषः नेच तत्रापि कापि संयोगी एतत्वात् इत्यादावव्याप्तिवारणाय मूले
कप्रतियोगिवैयधिकरण्यदलं व्यर्थं किंतु संयोगाभावस्य तादृशसंबंधेन साध्यवदवृत्तित्वसत्वात् संयोगी सत्त्वादित्यत्र गुणान्यवृत्त्यभाव मा-
दायातिव्याप्तिप्रसक्तावत द्वयेन साध्यवदवृत्तित्वघटकवृत्तायानिरवच्छिन्नत्वस्यानवच्छिन्नकत्वादिति वाच्यं॥ संयोगाभाववान् द्रव्यत्वादित्यादौ

तियोगितावच्छेदकसाध्याभावस्य निरूपकविशेषणाकरणं तत्तथा तत्र आपत्तिवारणाय तस्य सार्थकत्वात् ॥ नचैवमपि केवलान्वयिनि तत्प्राभावकानुद्धाव्यत्वादित्या
दि घटपटान्यतमाभावकस्य साध्याभावस्यैतद्विशेषणाक्रान्ततया सर्वस्यैवाभावस्य निरूपकप्रतियोगितावच्छेदकावच्छिन्नत्वादव्याप्तिरिति वाच्यं ॥ एतत्पक्षे तद्विशेषणतावि
च्छेदसंबंधेनैव साध्यवद्वृत्तित्वं वाच्यं । तथा च घटत्वत्वावच्छिन्नाभावस्य साध्यस्य निरूपकप्रतियोगितावच्छेदकावच्छिन्नत्वात् तद्व्यापकस्य संभवात् । न च तथापि जाति
त्वावच्छिन्नवत्त्वादौ साध्ये साध्याभावव्याप्ति उक्तविशेषणाक्रान्ते तु समानाधिकरणाभावस्यैव दुर्लभत्वादिति वाच्यं । साध्यप्रतियोगिकत्वसामानाधिकरण्याभावस्य संबंधेन सा
ध्यविशिष्टान्योन्याभावः स एव लक्षणघटको वाच्यः । न च जातित्वघटत्वघटत्वत्वादिसाध्ये उक्तविशेषणाक्रान्तजातित्वाभावस्यैव प्रसिद्धत्वात् । एवं घट
त्वाभावघटत्वाभावान्यतरवान् घटत्वपटत्वान्यतरत्वादित्यादौ चाप्रसिद्धिः अन्यतमेन घटत्वपटत्वस्वरूपस्य हेतुसमानाधिकरण उक्तविशेषणाक्रान्ताभावस्य प्रतियोगिता
वच्छेदकावच्छिन्नस्यैव सत्त्वात् अव्याप्तेर्दुर्वारत्वादिति विभावनीयम् । अत्र साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्मविशेष्यत्वं गगनत्वानवच्छेद्यत्वेन यावत्त्वव्याप्ति
योगितावच्छेदका वाच्याः । तावतैव न तत्र व्याकेत्वावच्छिन्नाभावो लक्षणघटक इति वाच्यं । साध्यतावच्छेदकसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नत्वादिनि
वेशपरिष्कारेणापि प्रायेणेदृशाज्ञाने तत्र तादृशाभावाप्रसिद्धेः । गगनाभावस्यैव तथात्वादिति । साध्यसमनियताभावमादायाव्याप्तिवारणाय गगनत्वानवच्छेद्यत्वप
देन गगनत्वेतरधर्माविच्छेद्यत्वमर्थः । परिष्कारायिक साध्यतावच्छेदकत्व कल्पे धूमत्वं वत्तावह्निरित्यादावतिव्याप्तिवारणाय साध्यतावच्छेदकेतरसाध्यवृत्तिधर्मविच्छिन्न
त्वपदेन साध्यतावच्छेदकताघटकसंसर्गावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकताभिन्नाया साध्यवृत्तिधर्मनिष्ठावच्छेदकताया निरूपितत्वमर्थः । इति चेत् न, केचित्तु ॥
धूमत्वप्रकारकप्रमाविशेष्यवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः । साध्याभावस्य प्रतियोगितावच्छेदके लाघवात् धूमत्वमेव तथा च साध्याभावप्रतियोगिता
यां साध्यतावच्छेदकातिरिक्त धूमत्वावच्छेद्यत्वं गगनत्वानवच्छेद्यत्वे न यावन्मात्रासत्त्वेन साध्याभावो लक्षणघटकः । केचित्तु व्यधिकरणाभाव एव । तदीयप्रतियोगि

त
वहि
गि

त्व॰

२ भिन्नत्वस्य साध्ये सत्वादनवच्छेदकानुसरणेन च प्रतियोगितावच्छेदकतावति विलक्षणवृत्तित्वरूपावच्छेदकत्वविशिष्टभिन्नत्वस्य साध्यतावच्छेदके सत्वेनानुपपत्त्यभावादित्याहुः

तन्न एतावता साध्यतावच्छेदकातिरिक्तपदेन पर्याप्त्यवच्छेदकताकभिन्नत्वं वाच्यं स्वपदं साध्यतावच्छेदकपरं। तथा च धूमत्वप्रकारकप्रमाविशेष्यत्वपर्याप्त्यवच्छेदकता

व्यापकपर्याप्त्यवच्छेदकताकभिन्नत्वस्य धूमत्वे सत्वादेव नव्याप्तिव्याप्तत्वं वा तत्तैवम्। तादात्म्येन प्रमेये साध्ये गगनत्वहेतावव्याप्तिः। तत्र प्रतियोगित्व

धिकरणताद्वृत्तिता वा प्रसिद्धेरिति विभावनीयं। यद्यपि गगनत्वे तरावच्छेद्यत्वं पर्याप्त्यवच्छेद्यत्वात् सदवृत्तिधर्मावच्छेद्यत्वं निवेदे न नैव तत्र महाकाशत्वेन दीर्घात्वायत्नश्च

ण समन्वयः संभवति न चापि यत्र तादात्म्येन गगनगमनात्यन्तरस्य साध्यते तादृशात्यन्तरत्वस्य हेतुत्वं तत्रातिगगनत्वेदः गगनेऽभेदेन सादात्म्याभिवारणा

य वृत्तिमत्साध्यतावच्छेदकसंबंधेन संबंधित्वानिवेशनीयं। तावतैव तत्र महाकाशत्वेन वारणसंभवेऽव्याप्तितादवस्थ्यं वृत्तिमत्त्वदेन हेत्वधिकरणसंबंधित्व

निवेशेन महागौरवमितिहेयं। तादात्म्यसंबंधेन प्रमेयसाध्यकवाच्यत्वादिहेतावव्याप्तिश्चेत्साप्पेवोद्धं। साध्यतावच्छेदकातिरिक्तगगनत्वातिधर्मावच्छेद्यत्व

साध्यतावच्छेदकसंबंधेन हेत्वधिकरणसंबंधित्व महत्तितधर्मावच्छेद्यत्वोक्तपाभावस्य घटीयोमितापां निवेशे प्रमेयं वान गगनत्वात् तादात्म्यगगनात्यन्तरत्वा

न्तरात्म गगनात्यन्तरत्वात् प्रमेयवान् वाच्यत्वादित्यादौ तादात्म्येन संबंधेन साध्यकस्थले महाकालत्वेदगगनत्वेदादि कमादायाव्याप्तिवारणसंभवेऽभेद

गगनाभावकत्वानुसरणे तु वे निवेशेन जन्यप्रमेयमात्यन्तरस्य तादात्म्येन साध्यतायां तादृशात्यन्तरत्वस्य हेतुत्वे हेत्वधिकरणगगने कालिकसंबंधेन गगनत्वावच्छेदका

दाय जन्यप्रमेयगगनत्वे दं चादाय साध्यमात्रस्यैव तथाविधाभावप्रतियोगितादवस्थ्यापत्तेः। यदि स्वरूपसंबंधावच्छिन्नगगनत्वानिष्ठावच्छेदकता २

दिन्नात्मा साध्यतावच्छेदकातिरिक्तनिष्ठावच्छेदकतानिरूपितत्वहेतुमद्वृत्तिवृत्तिधर्मावच्छेद्यत्वेन पाठ्यनिवेशेनाव्याप्तिरिति काच्यं विभाव्यते तदाय

४ तत्रायं सिद्धान्तः गगनत्वरूपेण गगनत्वविषयकत्वमाद्याय ज्ञानविषयकज्ञानत्वहेतुके विवक्षितासंबंधेन तद्रूपेण गगनस्य साध्यतायां विवक्षितस्य गगनत्वाभावसाध्यतेऽव्याप्तिः तदर्थं तु वच्छेदका

नुसरणे तु जन्यगगनात्यन्तरत्वस्य तादात्म्येन साध्यतायां तादृशात्यन्तरत्वस्य हेतुत्वे जन्यात्यन्तरत्वावच्छेदगगनत्वावमादायाव्याप्तिः।

ह्निधूमोज्ञवान्ववन्हेरित्यादौ ज्ञातिव्याप्तिरेव बोध्या। अत्र साध्याभाववृत्तियोगिताव प्रतियोगितावच्छेदकतस्य लाघवात् धूमत्वस्यैव कल्पनीतया साध्याभावप्रतियोगितायां निवे
के कथमभावविरहेण साध्याभावस्य लक्षणघटकत्वात् यदि चान्यनवृत्तिधर्मस्य प्रतियोगितावच्छेदकत्वं भासिकैमते यदि वा साध्यतावच्छेदकविशिष्टाधिकरणनैयायिकीय
प्रतियोगितावच्छेदकमेव साध्यतावच्छेदकातिरिक्तपदेन उच्यते तदा सुधीभिर्वेदे वाच्यं न नीमड़ इति ध्येयम्। परे त्वेयं तत्र साध्यतावच्छेदकातिरिक्त साध्यवृत्तिधर्मावच्छेद
त्वेत्यादिकल्पे साध्यतावच्छेदकातिरिक्तधर्मावच्छेद्यप्रतियोगितानिवेशे प्रमेयवान् वाच्यत्वादित्यादावप्रसिद्धिरूपं तत्र जगदीशादिमतायः महानसीयवह्न्यभाव
वारणाय प्रतियोगितावच्छेदकताघटकसंबंधेन साध्यवत्त्वं वाच्यं तेनैव तत्र ज्ञानत्ववारणसंभवेन अनवच्छेदकत्वसरणं विफलम्॥ प्रमेयवान् वाच्यत्वादित्यादौ तादृशाभाव
प्रसिद्धेरिति। अत्र साध्यतावच्छेदकताघटकसंबंधेन साध्यवृत्तित्वं वाच्यं प्रमेयवान्वाच्यत्वादित्यादौ घटाभावमादाय लक्षणसमन्वयसंभवेन तदव्याप्तिवारणाय
संगमनं। घटत्वादेः साध्यतावच्छेदकताघटकस्वरूपसंबंधेन साध्यवृत्तित्वविरहात् एवं तत्तद्व्यक्तित्वस्य साध्यताघटकसमवायसंबंधेन साध्यवृत्तिविरहेण तदव
च्छिन्नाभावमादाय वह्निमान्धूमादित्यादावव्याप्तिवारणायानवच्छेदकत्वानुधावनस्य सार्थक्यसंभवेन तस्य वैफल्याभिधानमसंगतमिति चेन्न अत्र केचित्तु
ज्ञानसवृत्तित्वरूपस्य महानसीयत्वस्य साध्यतावच्छेदकताघटकसंबंधेन साध्यवृत्तित्वविरहेण महानसीयवह्न्यभावमादायाव्याप्तिर्या तादृशार्थ
स्वकं मतकल्पत्वात् संगतिरित्याहुः। वस्तुतः महानसस्य संयुक्तरूपस्य महानसीयत्वस्य महानसवृत्तित्वादि संयोगातिरिक्तया तादृशसंबंधेन साध्यवृत्तित्वे
न तदवच्छिन्नाभावस्य लक्षणाघटकतया मेति मेवं प्रमेयवान् वाच्यत्वादित्यादौ मेयत्वविशिष्टघटाभावमादायाव्याप्तिनिवारणाय तादृशावच्छेदकस्वीकारा

समनीयत नानाधर्मावच्छिन्नप्रतियोगिताएका

प्रमेयवान्वाच्यत्वादित्यादौ तदवच्छिन्नप्रतियोगिताप्रसिद्धिनिबंधनव्याप्तिर्दलः। तत्रैव प्रमेयमात्रं कालं न वृत्ति विषयतासंबंधेन प्रमेयत्वव तत्राभाव मत्वाद्याप्र
२ सिद्धे वीर[illegible]मसंभववलिकयव्याप्तेरितिचेन्न। नच समवायेन प्रमेयसाध्यकज्ञात्मत्वादिहेतावव्याप्तिः प्रतियोगिव्याधिकरणतदत्यंताभावस्याप्रसिद्धे
रितिवाच्यं दिक्कृतविशेषणताविशेषसंबंधेन प्रमेयवदभावस्य प्रसिद्धत्वात्। यत्र समवायेन ज्ञानघटान्यतरस्य साध्यता तत्रात्मकपालान्यतरस्य हेतो
तायामव्याप्तिः। विपरीततया तादृशान्यतरवतो ज्ञानाभावस्य हेतुव्याधिकरणे कपाले दिक्कृतविशेषणतासंबंधेन अन्यतरवतो घटे रत्नवो हेत्व
धिकरणे अप्रसिद्धत्वात्। ज्ञानाभावस्य दिग्रूपत्वात्। ज्ञानवृत्तेर्दकत्वघटितलक्षणस्यैव। ज्ञायसाध्यतावच्छेदकतादेन रुपेण यत्तवच्छिन्नप्रतियोगितेति
तत्रैव प्रमेयसाध्यसद्धेतुसीयवद्भावप्रतियोगितावच्छेदकवान्हित्वावच्छिन्नत्वाधिकरणपर्वतादावपि सत्त्वात् कथं तादृशाभावस्य प्रतियोगिवैय
धिकरण्यं संभवतीति चेत् प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नाधिकरणवृत्तित्वस्य प्रतियोगिवैयधिकरण्यपदेन वाच्यत्वात्। महा
नसीयवद्भावस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणं यन्महानसीयत्ववह्नित्वोभयं तदवच्छिन्नाधिकरणत्वस्य पर्वतादौ सत्त्वात्। महान
सीयवह्निमान् धूमादित्यादौ साध्याभावस्य प्रतियोगिवैयधिकरण्यरक्षार्थं द्वित्वपरिष्कारस्य कर्तव्यतादिति वाच्यं जगदीशमते प्रत्येक
पर्याप्तिसंबंधेन तत्तदवच्छेदकतासत्त्वेन तद्दोषताकदस्यात्। नच तादृशप्रतियोगितावच्छिन्नस्य पर्याप्त्यनुयोगितावच्छेदकधर्माः तदवधि
त्वपर्याप्त्यवच्छेदकभावनिरूपिताधिकरणत्वाभाववत्त्वमेव प्रतियोगिवैयधिकरण्यपदेन वक्तव्यं तथा च महानसीयवद्भावस्य प्रति
योगितावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकीभूतद्वित्वावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपिताधिकरणत्वस्य पर्वता २

वंसत्वान्न तत्र प्रतियोगिवैयधिकरण्यासंभव इति वाच्यं। तथापि ईदृशरीत्या प्रतियोगितानवच्छेदकभिन्नत्वं त्राणे प्रतियोगितावच्छेदकतापर्याप्त्यनु-
योगितानवच्छेदकं यत्साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकं तद्भिन्नधर्मावच्छिन्नसामानाधिकरण्यमित्यंशस्यैव सम्यक्त्वे उक्तयावदवच्छेद्यत्वस्यवै-
यर्थ्यापत्तेः ज्ञानस्ता ईदृशपरिष्कारे न जगदीशमते प्रमाकं भैवं यादृशप्रतियोगितावच्छेदकावच्छिन्नादृशप्रतियोगिताश्रयमात्राधिकरणीकृततत्तद्व्यक्तिनि-
ष्ठाधिकरणतानवच्छेदकत्वसामान्यतोऽधिकरणतानवच्छेदकत्वद्वयीव्यतिरेकं न तत्तद्व्यक्तित्वावच्छिन्नकोटकूटवत्त्वमेव यादृशप्रतियोगितावच्छेदकाव-
च्छिन्नाधिकरणत्वमित्यादिपरिष्कारकल्पे तस्य प्रतियोगिवैयधिकरण्यसंभवान्नानुपपत्तिरिति चेत् यो ज्ञचसाध्यतावच्छेदकतदितरोभयमात्रावच्छिन्नत्वं
निवेशसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकत्वाभिन्नेष्टतदितरनिष्ठावच्छेदकतानिरूपकत्वाभावेइत्यर्थः। तथापि उभयाभावसाध्यायां न दोषता-
दवस्थ्यमिति निवेशनताईदृशनिरूपकत्वेन तत्पर्याप्त्यवच्छेदकत्वं निवेशामिति वाच्यं पर्याप्ति निवेशस्याव्यवस्थकत्वेऽ नादृत्ताभावस्यदैकाल्यापत्तेः न
चतादृशयत्रावकूटस्य निवेशेन दोषतादवस्थ्यमिति वाच्यं तथासति नान्दृशमाद्यधूमादिमत्तादावसंभवापत्तेः तस्य निरूपकाभिरूपकत्वघटत्वादिनि-
ष्ठावच्छेदकतानिरूपकत्वाद्यन्तराभावस्यपटत्वादिनिष्ठावच्छेदकतानिरूपकत्वाभावस्य पटत्वाद्यवच्छिन्नतावच्छिन्नाभावस्य च उक्तकूटान्तर्गतत्व-
याघटद्वयत्वाव प्रतियोगितायां तदशत्वादृशाद्युःस्वावच्छिन्नत्वस्वेतरधर्मावच्छिन्नत्वेतदुभयसंबन्धावच्छिन्नस्वनिष्ठावच्छेदकताभेदवत्त्वसंबंधेन
साध्यतावच्छेदकवैशिष्ट्यं प्रतियोगितायां वाच्यं अतो नानुपपत्तिः परमार्थस्तु यत्वापकजातेकत्वप्रकारकप्रमेयांगप्रतिस्वाजानकसंबंधेन

च

पर्याप्त्येन प्रतिबंधकत्वं इत्यत्रावत्त्वेन विलक्षणकेदस्यैव संसर्गः तत्रापि तादृशेन यावच्छेदं ने तिप्रतीतिसिद्धः वैलक्षण्यं गते दृएव तादृशेन समानव

४ च्छिन्नत्वपदेन विवक्षणीयः वैलक्षण्यं विशिष्टवैजयावत्वाविवृत्तमतेन दोषः न च परे यत्साध्यतावच्छेदकस्थले तदितरप्रसिद्धिवारणाय यद्

पे गेति प्रसिद्धिः कृता तत्रत्तमादायैव धूमत्ववत्वान् वन्हेरित्यादावतिव्याप्तिः साध्याभावस्य लक्षणाघटकत्वादिति वाच्यं तादृशानवच्छेदकत्वता

दृशेन यनि एतवच्छेदकत्व इयानी रूपितत्वं वलक्ष्यं तत्र साध्याभावमदायैवातिव्याप्तिः स्यसंभवात् यद्यपि महानसीयवन्हिभिन्नवान्हित्ववत्ता

न्धूमादिमत्त्यातिव्याप्तिः साध्याभावस्य तादृशावच्छेदकतानिरूपितप्रतियोगिताकत्वाभावात् किं तु अभावत्वांतरएव लक्षणघटक

तच्चपर्याप्तस्यापि परिष्कारः साध्यतावच्छेदकतावघटकसंसर्गत्वविशिष्टासाध्यतावच्छेदकतानिरूपितत्व तदन्यावच्छेदकतानिरूपितत्वाभाववत्वे

उत्तमपनवच्छिन्नत्वपदेन विवक्षणीयं तत्र साध्यतावच्छेदकघटकसंबंधावच्छिन्ना साध्यतावच्छेदकतानिरूपितावच्छेदकता तदन्यावच्छेदकतादृयानिरू

पितत्वनिवेशोपि जातिमतः समवायेन साध्यतायां धूमादिहेतावव्याप्तिः हेतुसमानाधिकरणस्य जातिमदन्यत्व यद्युतापस्यानिरूपक विशेषणा

त्वं तस्य प्रतियोगिनावच्छेदकत्वस्य जातौ सत्वात् इति वाच्यं विशिष्टसाध्यतावच्छेदक स्थले साध्यतावच्छेदकानिष्ठावच्छेदकता साध्यतावच्छेदकता

वच्छेदकावच्छिन्नत्वेन विशेषणीयतया तत्र तादृशाभावावारणात् इत्थं च वन्हिमान् धूमादित्यादौ महानसीयवन्हिर्नास्तीत्यत्राभावमादाया ४

व्याप्त्यापत्तेः वन्हित्वस्य स्वरूपतोभानादित्तिचेदत्र विशिष्टसाध्यतावच्छेदकस्थले निरुक्तप्रतियोगितावच्छेदकतानवच्छेदकं यत्साध्यता

वच्छेदकतावच्छेदकं तद्विशिष्टावच्छेदेन तत्सम्बन्धाधिकरण्यमेव व्याप्तिर्वाच्या। अत साध्ये तत्तद्व्यक्तिघटकत्वेऽपि नव्यव्याप्तौ सम्बन्ध एतादृशपरिष्का-
रस्य जगदीशेन केचित्पदिल्पनेन दूषितत्वात् न च तज्जगदीशसंगतं। वस्तुतस्तु व्यापकत्वसंबंधेन साध्यतावच्छेदकताविशिष्टाया प्रतियोगितावच्-
छेदकतानिरूपितत्वव्यापकत्वसंबंधेन साध्यतावच्छेदकतावदन्याप्रतियोगितावच्छेदकतानिरूपितत्वेन यत्तावत्त्वं उक्तयानवच्छेदत्व
पदेन विवक्षणीयं अन्योन्याभावप्रतियोगित्वमिति ध्येयं। अत्र वस्तुतस्तु कल्पानुसारेणापि जातिमत्त्वात् धूमादित्यादौ सत्त्ववद्घटान्योन्यास्ति द्रव्यत्ववद्घटो
न्यास्ति विजातीयवान्निर्नास्ति इत्याद्यभावप्रतियोगितावच्छेदकत्वसंबंधेन साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितत्वविरहादेव
निरूपकतया वच्छेद्य भिन्नाया अनवच्छेदकत्वस्य तत्रापि जातत्ववत्त्वादव्याप्तिः तादवस्थ्यमिति चेन्न तादृशाभावमादाय सत्ताद्रव्यत्वादौ प्रति
योगितावच्छेदकत्वसत्त्वेऽपि धूमत्वादिकं किंचिज्ज्ञानावच्छेदकत्वाभावमादाय प्रतीत्यसंगत्वादेवैतत्कल्पे व्याप्यसत्त्वात् न च तथापि सत्तात्वजातिम
द्घटोन्यास्ति द्रव्यत्वान्यजातिमद्घटोन्यास्ति इत्यभावप्रतियोगितापानिरूपकतद्व्यत्यानवच्छेदकत्वस्य सर्वत्र जातत्ववत्त्वादितिवा
च्यं विशिष्टे एसाध्यतावच्छेदकस्थलीयनिरूपके प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकतादितरोक्तयानवच्छेद्यत्वनिवेशनस्यावश्य
कतया उक्ताभावप्रतियोगितायामुक्तयानवच्छिन्नत्वविरहादेव तादृशाभावस्य लक्षणाघटकत्वात्। यद्यपि जातिमत्त्वात् द्रव्यत्वादित्यादौ प्रा
गुक्तरीत्या ऽभावमादाय सर्वत्रैव जातिप्रतियोगितावच्छेदकत्वसत्त्वादव्याप्तिः तथापि परम्परया जातित्वस्यैव साध्यतावच्छेदकत्वं स्वीकार्यं तथा
पि जातिमत्त्वात् धूमादित्यादौ जातित्वस्यैव साध्यतावच्छेदकत्वस्वीकारेणैवोपपत्तेर्वस्तुतस्तु कल्पानुधावनं व्यर्थं तथापि यत्र यत्र प्रकारो

॥सि०प०॥ तरेणाव्याप्तिपरिहार एव तत्र प्रकृतसाध्यतावच्छेदकस्य तु न स्यत्वे यादृशीकानुमानपक्षविकद्धत्वात्तद्वृत्तित्वानीयं। स्वाभिरूपितत्वस्य न्यूनतापकत्वसंबंधेन साध्य
तावच्छेदकत्ववदन्यावच्छेदकता। निरूपितत्वोत्तयसंबंधेनावच्छेदकतावदन्यत्वस्य प्रतियोगितायां निवेशेनैव उक्तदोषवारणसंभवात् तिद्धेयं। अत्र महानसी
५ यवह्न्यभावमादाय व्याप्तिवारणाय साध्यतावच्छेदकतादितरोत्तयावच्छिन्नप्रतियोगिताके निवेशात् तत्र साध्यतावच्छेदकपदं तदितरपदं च व्यर्थमिति
घयासंसर्गविदयपवाच्यं। तावतैव समवायेनाभाववारणसंभवे तद्वारणाय साध्यतावच्छेदकसंबंधप्रवेशे तु तत्प्रतियोगितायां व्यर्थमिति वाच्यं एवं च किसमुत्
धूमादित्यादौ कीदृक्संसर्गाविलक्षणघटक॰ संयोगेन वह्न्यभावस्य प्रतियोगितायां साध्यतावच्छेदकसंयोगेतरदितरघटत्वावच्छिन्नतादिति वाच्यं समवा
येन घटत्वघटकवस्य तत्र वर्तमानत्वात् मैवं समवायि वह्नेः संयोगेन साध्यतायां धूमादिहेतौ व्याप्यापत्तेः हेतुसमानाधिकरणस्य उक्तविशेषणकान्तस्य
समवायि वह्नेः समवायेनाभावस्य प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदकेसत्वात्। अत एव प्रमेयवत्वात् धूमादित्यादौ साध्यतावच्छेदकेतराप्रसिद्धि
निवंधनाव्याप्तिवारणाय येन केनचित् साध्यतावच्छेदकत्वाभिमतेन तत्प्रसिद्धिकृता अत्र प्रमेयमनुपपत्तिः न च जातिमतः समवायेन साध्यतायां वाच्य
त्वादिहेतावव्याप्तिः जातित्वेन जातिमद्भिन्नायाः प्रमेयत्वेन जातिनिष्ठावच्छेदकतांक प्रमेयत्ववानेति ज्ञानीया॰ याघटत्वादिना जातिप्राव
च्छेदकताकघटत्ववानिति प्रमात्मकज्ञानीयाया प्रकारताया अवच्छेदकत्वस्य जातेः सत्वात् स्वाश्रयनिष्ठस्वनिष्ठसंबंधेन जातिमद्भावप्रतियोगितायां सा
ध्यतावच्छेदकतादितरानिष्ठावच्छेदकतात्वप्रतिरूपितत्वात् नाद्यावच्छेदकताद्वयानिरूपकाया घटत्वाभावप्रतियोगिताया तदनवच्छेदकत्वस्य ज्ञातेः सत्वा
दिति वाच्यं। निरूकप्रकारतावच्छेदकतापर्यामेरवच्छिन्नत्वानिवेशात् उक्तप्रतियोगितावच्छेदकताया दायासतिव्याप्तिवारणान्तु न च तथापि दन्यवान् ५

गुणवान् द्रव्यत्वादित्यत्र तीते चेरवच्छिन्नावच्छेदकताया अपि जातिसाध्यके सत्त्वादिति वाच्यं। नन्वास्तु तदा साध्याभावगुणान्यत्वाभावाकम्प्रत्येकाभावमादाय निरुक्तहेतौ समाना
धिकरणाभावप्रतियोगितावच्छेदकात्वस्यैव सत्त्वात् उक्तप्रतीत्या जन्यो जातिभेदस्तैः पि तत्त्वमपान् परं च नादृशस्य साध्याभावनिरूपकरत्वाश्रयत्वस्यैव तं
दितरत्वपदवाच्यत्वसंभवात् अवच्छेदकत्वपर्याप्त्यनुयोगितावच्छेदकत्वेन वाच्यं। अत्र केचित् स्वावच्छिन्नत्वघटितसाध्याभावावच्छेदकतापर्याप्त्यनुयो
गितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतावच्छिन्नत्वोभयसंबंधेन स्वविशिष्टान्यप्रतियोगित्वं। साध्याभावावच्छेदकतादृशेऽन्ययान
वच्छिन्नप्रतियोगितापदेन विवक्षितं स्वावच्छेदकनिष्ठावच्छेदकमिति। शुद्धसाध्याभावावच्छेदकस्य तत्तत्यवच्छिन्नावच्छेदकत्वानिवेशनीमतोऽन्यस्याये परि
ष्कारः। तच्च महानसीयवह्निवृत्तित्वविशिष्टजातिमदन्यावप्रतियोगित्वं। स्वं साध्यतावच्छेदकवह्नित्वद्रव्यत्वादिनावच्छेदकं तन्न्यूनवृत्तित्वं वच्छिन्नत्वा
पादितकं च नयसनेरूपणघटकत्वमिति वाच्यं। वह्निनिरूपितसमवायेन महानसीयवह्निवृत्तित्वविशिष्टजातिमत्ता एवं निवेश्यान्या जातिपदवह्नित्वपरामर्शपिक
स्थितान्नचतनापि तस्य प्रतियोगितावच्छेदकवह्नित्वावच्छिन्नत्वानधिकरणत्वस्य पर्वतादौ सत्त्वात् तत्र प्रतीमानीवोद्यद्धिकरण्या संजयात् पुनः लक्षणघटक
त्वं तादवस्थ्यमिति वाच्यं। यादृशप्रतियोगितावच्छेदकधर्मो तादृशप्रतियोगितान्यसमानाधिकरणीभूत इत्यादि परिष्काराणां प्रायेण तत्स्वरूपलक्षणघटकत्वादि
ति ध्येयं। न च निरुक्तरूपावच्छिन्नत्वनिवेशेन तादृशाज्ञानाववारणेऽपि महानसीयवह्निवृत्तित्वविशिष्टजातिमद्वह्नित्वावच्छिन्नत्वमादाय तादवस्थ्य
मिति वाच्यं। किं त्वेवं यत्किंचिन्निष्ठावच्छेदकत्वानिरूपितप्रतियोगितायाः एव निरवच्छिन्नावच्छेदकत्वपदेन विवक्षणीयत्वात् तन्न्यूनतादृशस्य निवेशेन महानसी

६ यवच्छिन्नाभाववारणसंभवे तदर्थमुक्तयत्नवच्छिन्नत्वनिवेशनं स्वसमर्थकमिति वाच्यं। तादृशवच्छिन्नाभावप्रतियोगिताया व्याप्तिघटकीभूताया निवेशे न स्याद्व्यापकत्वात्तादृशवि
ष्टसाध्यतावच्छेदकस्य हेतुव्यापकीभूताभिचारिणि एतद्भूमभावे निवेशने पि ज्ञानस्य साध्यतावच्छेदकतापर्याप्तिकिंचिद्धर्मानवच्छिन्नत्वं निवेशनीयं। साध्यतावच्छेदकघटककिंचि
द्धर्मावच्छिन्नावच्छेदकताभिन्नरूपेण प्रतियोगिताया एव वारणे च तन्नावच्छेदकतापदेन वाच्या तेनवदोषः अनुगतविशिष्टसाध्यतावच्छेदकस्य तेनैव अनुगमप्रयानवादि
न्नावच्छेदकतानिवेशे तादृशे यत्र साध्ये कालिकसंबन्धेन घटत्वादिमान् धूमादित्यादौ सत्त्वसिद्ध्यवच्छिन्नवृत्तित्वविशिष्टजातिमानासीत् तत्राव्याप्तेरादायाव्याप्तिरिति न
साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नत्वं तदर्थमिति वाच्यं। दण्डिमान् दण्डसंयोगादित्यादौ तद्दण्डवृत्तित्वविशिष्टतद्दण्डत्ववत्ताकाले तत्सत्त्वाभावमादा
याव्याप्तेरिति चेन्न एवं साध्यतावच्छेदकघटकधर्मावच्छिन्नावच्छेदकताभिन्नरूपेण तावच्छेदकताया एव तेनानवच्छिन्नावच्छेदकतापदेन विवक्षितत्वात्
विशिष्टसाध्यतावच्छेदकस्य तेन व्यभिचारिण्यतिव्याप्तिवारणाय घटकीभूतं किंचिद्धर्मविशेषणं तेनानुदोषः। उक्तानिरूपकप्रतियोगितानायां साध्यतावच्छेद
कतावच्छेदकेतरावच्छिन्नावच्छेदकेतरानिरूपितत्वमपि विशेषणीयमतः सत्ताद्वयाकिं वा रसंडोपाधित्यमतो दण्डादिविशिष्टतद्व्यक्तिसत्त्वविच्छिन्नावच्छेद
कताकप्रतियोगिताकाभावमादाय दण्डिमान् दण्डसंयोगादित्यादौ नाव्याप्तिरिति ध्येयम्। साध्यतावच्छेदकतावच्छेदकत्वं येन रूपेण तद्रूपावच्छिन्नं तेन
रूपेण तद्रूपावच्छिन्नावच्छेदकतापर्याप्तिनिरूपकप्रतियोगिताकाभावस्य लक्षणघटकत्वकल्पे द्वयोरेव परिष्कारः। अत्र साध्यतावच्छेदकता
घटसंबन्धावच्छिन्नावच्छेदकतापरिष्कारः। विवक्षितत्वरूपत्वव ज्ञानाभावमादाय व्याप्तिवारणाय साध्यतावच्छेदकताघटकसंबन्धावच्छिन्न
त्वं अवच्छेदकतापर्याप्तं निवेशितं जगदीशेन तत्र च यत्र सत्ताकालिकसंबन्धेन महाकालीयत्वविशिष्टस्य समवायेन वाच्छिन्नविशिष्टस्य वह्नेः ६

साध्यतायां धूमादिहेतावव्याप्तिः। तत्र कालिकेन वह्नित्वविशिष्टस्य समवायेन महानसीयत्वविशिष्टस्य वह्नेरभावस्य हेतुमति सत्त्वात् इति चेन्न
तत्र केचित् स्वावच्छेदकसंबंधावच्छिन्नत्वस्य सामानाधिकरण्यत्वेन यसंबंधेन साध्यतावच्छेदकविशिष्टस्य प्रतियोगितावच्छेदकतादृशनिरूपकप्रति
योगिताकत्वाद्यात्मकलक्षणघटकः। अत्र संबंधव्यत्यासेन तादृशमहानसीयवह्न्यभावस्य न लक्षणघटकत्वात्॥ तन्मन्दं कालिकसंबंधेन जातिविशि
ष्टस्य समवायेन धूमत्वविशिष्टस्य धूमस्य साध्यतायां वह्न्यादावतिव्याप्त्यापत्तेः। साध्याभाववत्सानाद्यौक यसंबंधेन साध्यतावच्छेदकजाति इति
ष्टकालिकसंबंधावच्छिन्नावच्छेदकताविशिष्टायां धूमत्वनिष्ठसमवायसंबंधावच्छिन्नावच्छेदकतायाः अनिरूपकप्रतियोगिताकत्वाभाववत्त्व
तस्य लक्षणघटकत्वं किं तु अन्नत्वावीतरस्यैव तत्प्रतियोगितावच्छेदकत्वस्य जातिमद्धूमत्वे सत्त्वात् मैवं॥ स्वावच्छिन्नत्व स्वावच्छिन्नसाध्यतावच्छे
दकता समानाधिकरणत्वोभयसंबंधेन स्वविशिष्टान्यायाः साध्यतावच्छेदकताविशिष्टावच्छेदकताया अनिरूपकप्रतियोगिताकत्वाभाववत्त्वं लक्षणघटकीभूतत्वघटकीवाच्यः स्वप
दं साध्यतावच्छेदकताघटकसंसर्गपरामितिनुपरमार्थः। यद्यपि समवायेन जातिविशिष्टस्य कालिकेन धूमत्वविशिष्टस्य साध्यतायां वह्न्यादिहे
तौ तादृशावच्छेदकत्वादिनिरूपितप्रतियोगिताकत्वस्य समवायेन जातिमद्धूमसावाच्छिन्नाका वह्न्यादावव्याप्तिः संभवति तथापि तादृशसा
मानाधिकरण्यपदेन स्वावच्छिन्नसाध्यतावच्छेदकत्वबोध्यं पुनरप्यावश्यकं। समवायेन जातिमद्धूमत्वादिविशिष्टस्य वह्न्यादिहेतावव्याप्तिः
जातिमद्धूमत्वावच्छिन्नवावस्य लक्षणघटकत्वात् तस्य तादृशोभयसंबंधेन समवायविशिष्टत्वेन धूमत्वनिष्ठावच्छेदकतानिरूपकत्वात् अत्र
अस्माकमभिसिद्धांतः। स्वावच्छेदकसंबंधावच्छिन्नत्व स्वव्यापकताघटकीभूतयसंबंधेन साध्यतावच्छेदकतावदन्यायाः साध्यतावच्छेदकनिष्ठावच्छेद

सि॰ प कतानदानिरूपितत्वस्य स्वावच्छेदकसंबंधावच्छिन्नत्व स्वव्यापकत्वोभयसंबंधेन साध्यतावच्छेदकतानदन्यासानिस्वानवच्छेदकसंबंधानवच्छिन्नत्व स्वसा
७ मानाधिकरण्योभयसंबंधेन साध्यतावच्छेदकताविशिष्टयावच्छेदकतानदानिरूपितत्वस्य बाध्यसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकता
निरूपितत्वपदेनापि वक्तव्यत्वमतयात्र कोपि दोषः। परं त्वस्मान् सरणात् प्रमेयवत्त्वात् धूमादित्यादौ समवायसंबंधावच्छिन्नसाध्यतावच्छेदक
स्य तेनाभावाप्रसिद्धिनिबंधनो दोषावकाश इति निपुणतरविभावनीयं। नचावच्छेदकभेदेनावच्छेदकताया भिन्नत्वेऽपि समवायेन जातिविशिष्ट
स्य कालिकेन धूमत्वादिविशिष्टस्य साध्यतायां वह्न्यादिहेतौ किं तत्र समवायेन जातिविशिष्टधूमत्वविशिष्टस्याभावमादायाव्याप्तिस्तादृशाभा न
वस्य प्रतियोगितावच्छेदकताभावस्यैव तादृशोभयसंबंधेन साध्यतावच्छेदकतावत्त्वात् तदन्यस्वावच्छेदकसंबंधावच्छिन्नत्व स्वसामानाधिकरण्यो
भयसंबंधेन साध्यतावच्छेदकताविशिष्टावच्छेदकतानिरूपितप्रतियोगितात्वकस्य तस्य प्रतियोगितावच्छेदकत्वात् साध्यतावच्छेदकस्येति वाच्यं
नच तादृशाभावस्य तादृशोभयसंबंधेन साध्यतावच्छेदकतावदन्यस्वानवच्छेदकत्वादिसंबंधेन साध्यतावच्छेदकताविशिष्टं यद्वह्निन्नधूम
त्वाविशिष्टावच्छेदकतानिरूपितप्रतियोगिताकत्वात् लक्षणाघटकत्वमिति वाच्यं धूमत्वानिष्ठतादृशावच्छेदकतायास्तादृशोभयसंबंधेन धूमत्वानि त्व
ष्ठजातित्वावच्छिन्नावच्छेदकतावत्त्वात् स्वव्यापकत्वपदेन स्वावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकताव्यापकस्य विवक्षितत्वात् धूमत्वनिष्ठ
तादृशावच्छेदकत्वस्यैव तदन्यत्वात्। यदि कालिकेन जातिविशिष्टस्य समवायेन जातिविशिष्टस्य साध्यतायां व्यभिचारिण्यव्याप्तिः ७
साध्याभावस्य प्रतियोगितावच्छेदकजातिः जातित्वावच्छिन्नावच्छेदकतामात्रस्यैव स्वावच्छेदकताघटकसंबंधावच्छिन्नसाध्यतावच्छे

दकताव्यापकत्वविरहात् तत्तादृशान्यसंबंधेन साध्यतावच्छेदकतावदन्यनिरूपकावच्छेदकतानिरूपितत्वादिनिवेश्या अन्येनदास्यावाहिन्न्यवच्छेदक
संबंधावच्छिन्नवृत्तित्वस्य वह्निव्यापकत्वाज्ञसंबंधेन साध्यतावच्छेदकतावदन्यत्वे सति संबंधावच्छिन्नावच्छेदकसंबंधावच्छिन्नवृत्तित्वस्यावच्छिन्नस
मन्याधिकरणवृत्तित्वान्यसंबंधेन साध्यतावच्छेदकताविशिष्टप्रतियोगितावच्छेदकतावच्छिन्नानिरूपितसंबंधावच्छिन्नसाध्यताव
च्छेदकतात्वसादायनतन्दृष्टणसंगमनीयं हेतुतावच्छेदकधर्मस्याश्रयाधिकरणेति ॥ ननु द्रव्यं घटत्वपटत्वोभयस्मात् इत्यत्रातिव्याप्तिः हे
तुतावच्छेदकोभयत्वस्य सामान्यतोऽधिकरणतावच्छेदकरणतावच्छेदकत्वविरहेणैवोभयाभाववत्त्वापारिभाषिकहेत्वधिकरणत्वस्य घटपटयो
रसत्वात् नचात्र साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वेऽपि न द्रव्यत्वसामान्याधिकरण्यमित्यतो न दवाहिन्ना-
धिकरणत्वानिरूपिताधेयतावच्छेदकस्य हेतुतावच्छेदकविवक्षणेनैव तत्रातिव्याप्तिसंभव इति वाच्यम् । सत्तावान् द्रव्यान्यत्वविशिष्टसत्वगुण
कर्मान्यत्वविशिष्टसत्तोभयस्मात् इत्यत्राव्याप्त्यापत्तेः हेतुतावच्छेदकताहशोभयत्वद्रव्यनिरूपिताधेयतावच्छेदकत्वस्य सर्वैः स्वीकृतत्वा
दिति चेद्दत्त केचित् यन्निष्ठाभावप्रतियोगितानवच्छेदकं हेतुतावच्छेदकं तद्वत्स्वाश्रयाधिकरणं वाच्यं नोक्तातिव्याप्तिः । नच द्रव्यं
संयोगादित्यत्राव्याप्तिः संयोगत्वे किंचिन्निष्ठाभावप्रतियोगितानवच्छेदकत्वसत्वादिति वाच्यं । यन्निष्ठाभावेनिरवाहिन्नवृत्तित्वं निवेश्य
उक्तसकारणमित्याहुः सत्तावान् द्रव्यगुणकर्मान्यत्वविशिष्टसमेयत्वादित्यत्राव्याप्तिः नादृश हेतुतावच्छेदकधर्मस्वाश्रयाधिकरणनिष्ठाभा

सि प। वमतिर्ज्ञानीनानवच्छेदकमत्वात्। यत्तु स्वाश्रयाधिकरणपदेन यद्विशिष्टवत्त्वमीय प्रकारतावच्छेदकं तच्चाविषयस्य स्वाश्रयाधिकरणं वाच्यमतो न कोऽप्यन्
८ पपत्तिरित्याहुः तन्न तथा सति यद्विशेष्यकप्रमीयप्रकारतावच्छेदकं हेतुतावच्छेदकं तदेव हेतुतावच्छेदकावच्छिन्नानधिकरणभिन्नस्यैव सत्त्वे निरुक्त
स्वाश्रयाधिकरणत्वघटितत्वनिरुक्तेः नयत्नादिवैयर्थ्यापत्तिरिति चेदापातिः। तस्य कल्प्यान्ततया तेन जगदीशकल्पितेऽकापत्तिवारणात् तद्देशमा स्व
वानं तु केवलपदत्व विषयत्वसंबंधावच्छिन्नाधिकरणतावच्छेदकसत्त्वादेव सामञ्जस्ये तादृशाधिकरणतावच्छेदकत्वस्य तेन तादृशेनाप्यत्रावसत्त्वा
न्नातिव्याप्तिः न च तथापि सत्येकरणत्वासादृश्येव ति पितृ ज्ञानमिति प्रतीत्युपपत्तौ विषयित्वसंबन्धावच्छिन्नत्वयत्वावच्छिन्नाधिकरणता
यां मानाभाव इति वाच्यं एकमात्रविषयकज्ञाने तादृशोल्लयवदिति प्रतीतेः प्रमात्वापत्तेः अथवा प्रमीयप्रकारतावच्छेदकं हेतुतावच्छेदके वि
शेषणीभूतत्वविवक्षणीयम् तेन पर्वतत्वतरत्वधर्मविशिष्टधूमत्वावच्छिन्नाधिकरणतात्वं कैश्चिद्धूमवदिति विशिष्टपक्षे ११
तौ शुद्धधूमत्वावच्छिन्नाधिकरणताया मानाभाव इति चेत्। ननु धूमवदिति प्रतीतौ धूमत्वस्य विशेषणविधया भानमेव प्रमाणमिति चे
न्न तादृशप्रतीतौ धूमत्वस्योपलक्षणतया एतस्य विशेषणताया अप्रामाणिकत्वात् न च पर्वतीयधूमवदिति ज्ञानेऽपि धूमत्वस्योपलक्षणतया
भानात् अधिकरणे पर्वतीयत्वावच्छिन्नाधिकरणताया एवं तादृशप्रतीत्युपपत्तौ पर्वतत्वादिविशिष्टधूमत्वावच्छिन्नाधिकरणतायां किं प्र
माणमिति वाच्यं तत्र पर्वतत्वादेः समानाधिकरणवृत्तित्वेन संबन्धेन धूमत्वविशिष्टत्वाभावे तच्च धूमत्वस्य विशेषणतया ज्ञानस्य सर्वसिद्धत्वेन तस्यैव प्रमाण
त्वात्॥

त्वात् तथापि धूमत्वस्योपलक्षणतया ज्ञानस्वीकारे उपलक्षणधर्मस्य विशेषणतया ज्ञानस्याप्रामाणिकत्वेन तदंशे पर्वतस्यापि उपलक्षणतया ज्ञानस्वी
कारेण महानसादावपि तादृशप्रतीतिनियामकः पर्वतत्वोपलक्षितधूमत्वोपलक्षिताधिकरणतायाः सत्वेन महानसादावपि पर्वतीयधूमवदिति प्रती
त्यापत्तेरिति विज्ञावनीयं। अथ पर्वतत्वादिविशिष्टधूमत्वावच्छिन्नाधिकरणतामादायैव वह्निमान् धूमादित्यादि सर्वत्र लक्षणसंगमे हेतुतावच्छेदक
धर्मे ज्ञप्यज्ञापकभावनिवेशो व्यर्थ इति चेन्न विषयत्वस्य विषयस्वरूपत्वमते इदं द्रव्यं ज्ञानविषयत्वादित्यादौ हेतुतावच्छेदकज्ञानविषयतात्वावच्छिन्नाधिक
रणत्वाप्रसिद्ध्याऽव्याप्तिरिति केचित् द्रव्यं विशिष्टसत्वादित्यादौ गुणत्वविशिष्टसत्तात्वावच्छिन्नाधिकरणतामादाय गुणे हेतुतावच्छेदके ज्ञप्यज्ञापकभावनिवे
शो व्यर्थ इति चेन्न द्रव्यं विशिष्टसत्त्वादित्यादौ उक्तक्रमेण गुणत्वविशिष्टसत्तात्वावच्छिन्नाधिकरणे हेतुतावच्छेदकावच्छिन्नाधिकरणतासत्वादेवाव्याप्तिवा
ता रणाय हेतुतावच्छेदकावच्छिन्नाधिकरणपदेन हेतुतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छेदकताकनिरूपकताकाधिकरणत्वस्यैव विवक्षणीयतया
वह्निमान् धूमादित्यादौ चत्वराद्यधिकरणाप्रसिद्ध्याऽव्याप्तिवारकत्वेन हेतुतावच्छेदके निरुक्तज्ञप्यज्ञापकभावनिवेशस्य सार्थक्यात्। न चैतावता हेतुतावच्छे
दकतापर्याप्त्यधिकरणधूमावच्छिन्नाधिकरणनैव विवक्षणीयतावतां गुणत्वावच्छिन्नसत्तात्वावच्छिन्नसत्तात्वावच्छिन्नाधिकरणतावारणं संभवति गुण
कर्मान्यसत्तात्वान्यस्यैव हेतुतावच्छेदकतापर्याप्त्यधिकरणत्वादिति वाच्यं। समानाधिकरणवृत्तित्वसंबन्धेन गुणकर्मान्यत्वस्य सत्तावच्छेदकतास्यैव
सत्तात्वमात्रस्यैव हेतुतावच्छेदकतया गुणत्वविशिष्टसत्तात्वस्यापि हेतुतावच्छेदकतापर्याप्त्यधिकरणतया तदवच्छिन्नाधिकरणतामादायैव उक्ताव्या

त्तिमादवस्थाद्वतो हेतुतावच्छेदकतापर्याप्त्यधिकरणपर्याप्तिकाऽवच्छेदकतानिवेशस्यावश्यकत्वादिति विभावनीयं। तच्च य[illegible]त्र सत्त्वाभावाधिकरणसैवद्वेन गुणक
१ र्मान्यत्वविशिष्टसत्ताभावस्य हेतुतावच्छेदकाभावस्य च साध्याभावानधिकरणविशिष्टसत्ताभाववद्वृत्तित्वाभावाधिकरणत्वाभावसिध्यान्तर्विशिष्टसत्तात्वरूपहेतुतावच्छेदकगुण
निष्ठाधिकरणतानवच्छेदकत्वसामान्येनाऽधिकरणतावच्छेदकत्वाज्ञ्याभावसत्वादव्याप्तिरिति चेद्दत्र केचिन्नीलघूमादिवदकरुकहेतौ चैव नोपपन्नइतीव
स्तुतस्तु हेतुतावच्छेदकतापर्याप्त्यवच्छेदकतासामान्येनादृश्याधिकरणतावच्छेदकतापर्याप्त्यनवच्छेदकत्वसामान्येनाऽधिकरणतावच्छेदकतापर्याप्त्यवच्छेदक
त्वेत्यादिक्रमेणोत्तयाभावस्यैवानिवेशनीयतया सामान्यतनुर्गतगुणकर्मान्यत्वनादृशोऽनसमानाभाववद्विरहात् न अव्याप्तिरनावात इति। एतेन नष्टनीलघूमत्वादि
केव्याप्यतावच्छेदकं न वस्यैव तादृशोपाप्रयोगे अधीयेन पुरुषस्याग्रहइति जगदीशधृतवस्तुतस्तु कल्पाजसेगातिरतिप्रत्युक्तेति विभावनीयं। नचा
भावस्य हेत्वाधिकरणे निरवच्छिन्नवृत्तित्वानिवेशे नैवाव्याप्तिवारणसंभवे प्रतियोग्यसमानाधिकरणेति व्यर्थमिति चेत्र जग्रेसमाधास्य
मानत्वादितिरेखनद्वारेणैव तस्य स्वीकार्यत्वात्।कुत्रचित्प्रमाण्येकानचाऽजाभावस्य हेत्वाधिकरणे निरवच्छिन्नवृत्तित्वनिवेशेऽपि विशिष्टसत्ता-
भाववान्गुणत्वादित्यादव्याप्तेः। विशिष्टसत्तास्वरूपस्य गुणे निरवच्छिन्नवृत्तित्वादिति वाच्यम्॥



१८

